श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
ओं नमो भगवते वासुदेवाय

महर्षि वेदव्यासप्रणीतं श्रीमद्भागवतमहापुराणम्

# ॥ पञ्चमस्कन्धे त्रयोदशोऽध्यायः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

ओं नमो भगवते वासुदेवाय

# श्रीमद्भागवतमहापुराणम्

## ॥ पञ्चमस्कन्धे त्रयोदशोऽध्यायः ॥

ब्राह्मण उवाच

दुरत्ययेऽध्वन्यजया निवेशितो
रजस्तमःसत्त्वविभक्तकर्मदृक्।
स एष सार्थोऽर्थपरः परिभ्रमन्
भवाटवीं याति न शर्म विन्दति ॥ 1 ॥

यस्यामिमे षण्नरदेव दस्यवः
सार्थं विलुम्पन्ति कुनायकं बलात्।
गोमायवो यत्र हरन्ति सार्थिकं
प्रमत्तमाविश्य यथोरणं वृकाः ॥ 2 ॥

प्रभूतवीरुत्तृणगुल्मगह्वरे
कठोरदंशैर्मशकैरुपद्रुतः।
क्वचित्तु गन्धर्वपुरं प्रपश्यति
क्वचित्क्वचिच्चाशुरयोल्मुकग्रहम् ॥ 3 ॥

निवासतोयद्रविणात्मबुद्धि -
स्ततस्ततो धावति भो अटव्याम्।
क्वचिच्च वात्योत्थितपांसुधूम्रा
दिशो न जानाति रजस्वलाक्षः ॥ 4 ॥

अदृश्यझिल्लीस्वनकर्णशूल
　उलूकवाग्भिर्व्यथितान्तरात्मा।
अपुण्यवृक्षान् श्रयते क्षुधार्दितो
　मरीचितोयान्यभिधावति क्वचित्॥ **5**॥

क्वचिद्वितोयाः सरितोऽभियाति
　परस्परं चालषते निरन्धः।
आसाद्य दावं क्वचिदग्नितप्तो
　निर्विद्यते क्व च यक्षैर्हृतासुः॥ **6**॥

शूरैर्हृतस्वः क्व च निर्विण्णचेताः
　शोचन् विमुह्यन्नुपयाति कश्मलम्।
क्वचिच्च गन्धर्वपुरं प्रविष्टः
　प्रमोदते निर्वृतवन्मुहूर्तम्॥ **7**॥

चलन् क्वचित्कण्टकशर्कराङ्घ्रि -
　र्नगारुरुक्षुर्विमना इवास्ते।
पदे पदेऽभ्यन्तरवह्निनार्दितः
　कौटुम्बिकः क्रुध्यति वै जनाय॥ **8**॥

क्वचिन्निगीर्णोऽजगराहिना जनो
　नावैति किञ्चिद्विपिनेऽपविद्धः।
दष्टः स्म शेते क्व च दन्दशूकै -
　रन्धोऽन्धकूपे पतितस्तमिस्रे॥ **9**॥

कर्हि स्म चित्क्षुद्ररसान् विचिन्वं -
　स्तन्मक्षिकाभिर्व्यथितो विमानः।
तत्रातिकृच्छ्रात्प्रतिलब्धमानो
　बलाद्विलुम्पन्त्यथ तं ततोऽन्ये॥ **10**॥

क्वचिच्च शीतातपवातवर्ष -
प्रतिक्रियां कर्तुमनीश आस्ते।
क्वचिन्मिथो विपणन् यच्च किञ्चि -
द्विद्वेषमृच्छत्युत वित्तशाठ्यात्॥ **11** ॥

क्वचित्क्वचित्क्षीणधनस्तु तस्मिन्
शय्यासनस्थानविहारहीनः।
याचन् परादप्रतिलब्धकामः
पारक्यदृष्टिर्लभतेऽवमानम्॥ **12** ॥

अन्योन्यवित्तव्यतिषङ्गवृद्ध -
वैरानुबन्धो विवहन् मिथश्च।
अध्वन्यमुष्मिन्नुरुकृच्छ्रवित्त -
बाधोपसर्गैर्विहरन् विपन्नः॥ **13** ॥

तांस्तान् विपन्नान् स हि तत्र तत्र
विहाय जातं परिगृह्य सार्थः।
आवर्ततेऽद्यापि न कश्चिदत्र
वीराध्वनः पारमुपैति योगम्॥ **14** ॥

मनस्विनो निर्जितदिग्गजेन्द्रा
ममेति सर्वे भुवि बद्धवैराः।
मृधे शयीरन् न तु तद्व्रजन्ति
यन्न्यस्तदण्डो गतवैरोऽभियाति॥ **15** ॥

प्रसज्जति क्वापि लताभुजाश्रय -
स्तदाश्रयाव्यक्तपदद्विजस्पृहः।
क्वचित्कदाचिद्धरिचक्रतस्त्रसन्
सख्यं विधत्ते बककङ्कगृध्रैः॥ **16** ॥

तैर्वञ्चितो हंसकुलं समाविश -
न्नरोचयन् शीलमुपैति वानरान्।
तज्जातिरासेन सुनिर्वृतेन्द्रियः
परस्परोद्वीक्षणविस्मृतावधिः॥ **17** ॥

द्रुमेषु रंस्यन् सुतदारवत्सलो
व्यवायदीनो विवशः स्वबन्धने।
क्वचित्प्रमादाद्गिरिकन्दरे पतन्
वल्लीं गृहीत्वा गजभीत आस्थितः॥ **18** ॥

अतः कथञ्चित्स विमुक्त आपदः
पुनश्च सार्थं प्रविशत्यरिन्दम।
अध्वन्यमुष्मिन्नजया निवेशितो
भ्रमञ्जनोऽद्यापि न वेद कश्चन॥ **19** ॥

रहूगण त्वमपि ह्यध्वनोऽस्य
सन्न्यस्तदण्डः कृतभूतमैत्रः।
असज्जितात्मा हरिसेवया शितं
ज्ञानासिमादाय तरातिपारम्॥ **20** ॥

राजोवाच
अहो नृजन्माखिलजन्मशोभनं
किं जन्मभिस्त्वपरैरप्यमुष्मिन्।
न यद्धृषीकेशयशःकृतात्मनां
महात्मनां वः प्रचुरः समागमः॥ **21** ॥

न ह्यद्भुतं त्वच्चरणाब्जरेणुभि -
र्हतांहसो भक्तिरधोक्षजेऽमला।

मौहूर्तिकाद्यस्य समागमाच्च मे
    दुस्तर्कमूलोऽपहतोऽविवेकः ॥ 22 ॥

नमो महद्भ्योऽस्तु नमः शिशुभ्यो
    नमो युवभ्यो नम आ वटुभ्यः।
ये ब्राह्मणा गामवधूतलिङ्गा -
    श्चरन्ति तेभ्यः शिवमस्तु राज्ञाम् ॥ 23 ॥

श्रीशुक उवाच
इत्येवमुत्तरामातः स वै ब्रह्मर्षिसुतः
सिन्धुपतय आत्मसतत्त्वं विगणयतः
परानुभावः परमकारुणिकतयोपदिश्य
रहूगणेन सकरुणमभिवन्दितचरण
आपूर्णार्णव इव निभृतकरणोर्म्याशयो
धरणिमिमां विचचार ॥ 24 ॥

सौवीरपतिरपि सुजनसमवगतपरमात्मसतत्त्व
आत्मन्यविद्याध्यारोपितां च देहात्ममतिं विससर्ज
एवं हि नृप भगवदाश्रिताश्रितानुभावः ॥ 25 ॥

राजोवाच
यो ह वा इह बहुविदा महाभागवत त्वयाभिहितः
परोक्षेण वचसा जीवलोकभवाध्वा स ह्यार्य -
मनीषया कल्पितविषयो नाञ्जसाव्युत्पन्नलोक -
समधिगमः अथ तदेवैतद्दुरवगमं समवेता -
नुकल्पेन निर्दिश्यतामिति ॥ 26 ॥

॥ इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां
पञ्चमस्कन्धे त्रयोदशोऽध्यायः ॥